संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - १४
प्रधानसम्पादकः - राधावल्लभत्रिपाठी

श्रीमदुमामहेश्वरविरचिता

# तत्त्वचन्द्रिका

सम्पादकः
मुदिवेडु-चन्द्रशेखरः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# भूमिका

**अद्वैतसिद्धान्तविकासः**

सर्वदर्शनोत्तमस्य अद्वैतदर्शनस्य विकासकालः प्राचीन–मध्यम–आधुनिकभेदेन त्रेधा विभक्तुं शक्यते। तत्र प्राचीनो भागः दशमशतकान्तः, मध्यमो भागः षोडश–शतकान्तः, आधुनिकभागस्तु अद्यावधिकः, इतः परश्च। प्राचीने काले शाङ्करभाष्यस्य, भामतीविवरणप्रस्थानयोर्बीजावापः, न्यायशैलीनिबद्धाः भेदवादखण्डनपराः अद्वैतग्रन्थास्स्वतन्त्रभूताः मध्यमे काले प्रादुरभूवन्।

एतादृशस्य श्रुतिसिद्धस्य प्राचीनतमस्य अज्ञविज्ञोपकारकस्य सकलदर्शनशिरोऽलङ्कारभूतस्य अद्वैतवेदान्तदर्शनस्य विशेषतः प्रबलप्रतिवादिनः भेदवादिनः न्यायवैशेषिकादयः, शालिकानाथप्रभृतयश्च पूर्वमीमांसका आसन्।

द्वैतमतप्रवर्तकाः आनन्दतीर्थादयोऽपि प्रतिवादिष्वन्यतमा अभूवन्। आनन्दतीर्थेन निन्दितस्य अद्वैतसिद्धान्तस्य रक्षणार्थम्, तर्कैणैवसमाधानार्थञ्च प्रवृत्तेषु ग्रन्थेषु चित्सुखीय न्यायकमरन्द–न्यायदीपावली–अद्वैतसिद्धि–पञ्चदशी–खण्डनखण्डखाद्यमित्यादयश्च विशिष्योल्लेखार्हाः।

एवं दशमशतकादनन्तरमुत्पन्नेषु षोडशशतकान्तेषु ग्रन्थेषु न्यायमकरन्द–न्यायदीपावली–वेदान्तकौस्तभाद्यादिषु भामतीविवरणप्रस्थानानां विकासः, अनिर्वचनीयख्यातिसाधनम्, अखण्डार्थत्वनिरूपणमित्यादिविषयाश्च विकसिता दृश्यन्ते। विशेषतश्च अद्वैतसिद्धान्तखण्डनपरस्य द्वैतसिद्धान्तमण्डनपरस्य व्यासतीर्थन्यायामृतस्य तद्व्याख्यायाः न्यायामृततरङ्गिण्याः– न्यायभास्करस्य च खण्डनाय प्रवृत्तानाम्, अद्वैतसिद्धि–गुरु–लघुचन्द्रिका–विट्ठलेशीयादीनां ग्रन्थानाम्, एवमाधुनिके काले विशिष्टाद्वैतखण्डनपराणां शतदूषणीखण्डनपराणां शतभूषण्यादिग्रन्थानां चाविर्भावः अद्वैतसिद्धान्तस्य विकासोन्मुखतामापादयति।

तत्त्वचन्द्रिकाख्योऽयं प्रकृतग्रन्थः वादग्रन्थेष्वन्तर्भवतीति ग्रन्थस्यापात–परिशीलनेन निर्णीतमस्ति। अस्मिन् ग्रन्थ विशिष्य द्वयोः निरासः कृतः । यथोक्तं ग्रन्थकारेण तत्त्वचन्द्रिकायां प्रारम्भे–**"भाष्यं रामानुजस्यात्र श्रीकण्ठस्यापि दूष्यते"** इति ।

निर्गुणब्रह्मोपासकः सर्वतन्त्रस्वतन्त्रः परभाष्यभञ्जनशीलः नैकग्रन्थानां प्रणेता श्रीउमामहेश्वरः तत्त्वचन्द्रिकाख्यं ग्रन्थं जगतीतले अद्वैततत्त्वप्रसाराय स्वस्वतन्त्रविचारैः प्रणीतवानिति निश्चप्रचं ज्ञायते। एतादृश अप्रतिहतप्रतिभावतां महतां जीवनकालादिविषये ज्ञानमप्यावश्यकत्वेन स्वीक्रियते। तदर्थमेवात्र मया

**"द्वैतं मायामयं प्राह[1] श्रुतिस्सत्यार्थवादिनी।**
**वास्तवं प्राह चाद्वैतं सर्वमानातिगामिनी।।"**

इत्यनेन, "¹मायामात्रम्" इति श्रुतिः स्वोक्तार्थे प्रमाणत्वेन दर्शिता । इत्थमुपबृंहणविरोधान्न[2] परकीयं व्याख्यानं युक्तम्।

ननु परेणापि स्वोक्तार्थे स्मृतिर्दर्शितेति चेन्न,

**"वैष्णवानामलाभे तु विधवामपि भोजयेत्।**
**सा चेद्रजस्वला जाता शङ्खतोयेन शुद्ध्यति।।"**

इत्यादिस्मृतिवचनवत्तदुदाहृतस्मृतिवचनस्याप्रमाणत्वात्, मध्वस्य तदनुयायिनाञ्च श्रुतिस्मृतीतिहासपुराणकल्पकत्वं त्रैलोक्यप्रसिद्धम्। मध्वविध्वंसन-मध्वन्यक्कारादिनिबन्धेषु च प्रसिद्धम्। कल्पितञ्च स्मृतिद्वयं मायापरमार्थशब्द-मात्रव्याख्यानाय प्रवृत्तम्, न तु "मायामात्रमिदं द्वैतम्" इति श्रुतिव्याख्यानपरम्[3]। यदि काचिदन्यैव[4] शिष्टसम्मता, "मायामात्रमिदं द्वैतम्" इति श्रुतिं व्याख्यातुमेव प्रवृत्ता स्मृतिर्लोके संभवेत्तथापि सा मनुवचनविरोधादप्रमाणम्।

ननु कथं स्मृतिग्रन्थानां समबलत्वादेकेनान्यस्य[5] बाध इति चेन्न, समबलत्वासिद्धेः। "²यद्वै किञ्च मनुरवदत्" इति श्रुत्यैव मनोः परमाप्तत्वं सूचितम्। मनुस्मृतिविरुद्धञ्च स्मृतिवचनमप्रमाणमिति स्मृतिषु घण्टाघोषः। अत एव ◈स्मृतिचन्द्रिकायाम् "यत्र पुनर्मानवस्य स्मृत्यन्तरेण विरोधः तत्र मनूक्तार्थ एव श्रेयानि"त्युक्त्वा,

**"³यत्पूर्वं मनुना प्रोक्तं धर्मशास्त्रमनुत्तमम्।**
**न हि तत्समतिक्रम्य वचनं हितमात्मनः।।"**

---

पादटिप्पणी–

| | | | |
|---|---|---|---|
| 1. | M. °प्राहुः– | 2. | M. °इत्थुपबृंहण– |
| 3. | Ti. °व्याख्यानाय– | 4. | My, Ti. °काचिदस्यैव– |
| 5. | My. °एकत्वेनान्यस्य– | | |

टिप्पणी–

| | | | |
|---|---|---|---|
| १. | गौ. का. (१–१७) | २. | तै.सं. (२–२–१०–२) |
| ३. | स्मृ. च (१–४, ५) | | |

◈ **विशेषटिप्पणी–** स्मृतिचन्द्रिकाकारः– 'याज्ञिकदेवणभट्टोपाध्यायः'।

## ॥ अप्रकाशितपाण्डुलिपिग्रन्थमालायां प्रकाशिताः ग्रन्थाः ॥

| कुसुमसंख्या | ग्रन्थनाम | सम्पादकः | मूल्यम्* |
|---|---|---|---|
| 1. | ठक्कुरसंग्रामसिंहविरचिता **बालशिक्षा** | भवानीशङ्करशर्मा | 190/- |
| 2. | सुकुमारकविप्रणीतं **श्रीकृष्णविलासमहाकाव्यम्** (**बालपाठ्यव्याख्योपेतम्**) | ई. एम्.राजन् | 220/- |
| 3. | नारायणसुधीकृतः **भाट्टनयोद्योतः** | सूर्यनारायणनागेन्द्रभट्टः | 425/- |
| 4. | अन्नम्भट्टप्रणीतं **सिद्धाञ्जनम्** (**तत्त्वचिन्तामण्यालोकव्याख्योपेतम्**) | एम्. विश्वनाथशास्त्री | 240/- |
| 5. | वासुदेवत्रिपाठिप्रणीतः **प्रायश्चित्तविलोचनः** | सन्तोषकुमारपण्डा | 250/- |
| 6. | आनन्दानुभवकृतः **पदार्थतत्त्वनिर्णयः** | शुद्धानन्दपाठकः | 190/- |
| 7. | वासुदेवकविकृतं **युधिष्ठिरविजयम्** (**बालव्युत्पत्तिकारिणी-टीकोपेतम्**) | वाई. एस्. रमेशः | 600/- |
| 8. | वराहमिहिरकृता **बृहत्संहिता** (**उत्पलपरिमलव्याख्योपेता**) | के.वी. शर्मा | 675/- |
| 9. | **याज्ञिक्युपनिषत्** (**विज्ञानेश्वरप्रणीतविवरणसहिता**) | सूर्यनारायणनागेन्द्रभट्टः | 280/- |
| 10. | किलिमङ्गलं नारायणनम्पूतिरिप्रणीता **प्रक्रियासर्वस्वविवृतिः** | एम्. के. आण्ड्रयूस् | 165/- |
| 11. | मधुसूदन-ओझा-कृतः **व्याकरणविनोदः** | महेन्द्रकुमारशर्मा | 330/- |
| 12. | भूमभट्टप्रणीतम् **अर्जुनरावणीयम्** (**कैरलीटीकोपेतम्**) | विजयपालशास्त्री | 340/- |
| 13. | श्रीरामचन्द्रभट्टप्रणीतं **सभ्याभरणम्** (**मयूखमाला-व्याख्योपेतम्**) | राजेन्द्रप्रसादभट्टः | 300/- |
| 14. | उमामहेश्वरविरचिता **तत्त्वचन्द्रिका** | एम्. चन्द्रशेखरः | 340/- |
| 15. | जम्बुनाथविरचितः **प्रश्नसारसमुद्रः** | एम्. अनन्तपद्मनाभभट्टः | 260/- |
| 16. | उदयङ्करविरचिता **परिभाषाप्रदीपार्चिः** | मुरारीलालशर्मा | 160/- |
| 17. | माधवदेवकृता **तर्कभाषाव्याख्या सारमञ्जरी** | टी.डी. मुरलीधरः | 160/- |
| 18. | चन्द्रदत्तविरचितं **भगवद्भक्तिमाहात्म्यम्** | बाबूरामशर्मा | 440/- |

* संस्थाननियमानुसारं मुद्रितमूल्यस्य 40% अपकर्षः प्रदीयते।

प्रतिकृतीनां कृते-

**Rashtriya Sanskrit Sansthan (Deemed University)**
56-57 Institutional Area, Janakpuri, New Delhi-110058
EPABX: 011-28524993 / 28521994 / 28524995, Extn.214-215
**E-mail: rskssale@yahoo.co.in , rsks@nda.vsnl.net.in**
**www.sanskrit.nic.in**